Roll No.
रोल नं.

100058

Code No. **002**

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

# संस्कृतम्

# SANSKRIT

*General Instructions :*

*सामान्य निर्देश :*

***Read the following instructions very carefully and strictly follow them :***

***निम्नलिखित निर्देशों को ध्यान से पढ़ें एवं पूर्णरूप से उनका अनुपालन करें।***

*Time allowed : 3 hours* — *Maximum marks : 80*

*निर्धारित समय : होरात्रयम्* — *अधिकतम अंक : 80*

***Note / नोट :***

*(i)* *Please check that this question paper contains 8 printed pages.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में 8 मुद्रित पृष्ठ हैं।*

*(ii)* *Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.*
*प्रश्न-पत्र के दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।*

*(iii)* *Please check that this question paper contains 12 questions.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में 12 प्रश्न हैं।*

*(iv)* ***Please write down the Serial Number of the question in the answer-book before attempting it.***
***कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें।***

(v) *15 minutes time has been allotted to read this question paper. The question paper will be distributed at* **10.15** *a.m. From* **10.15** *a.m. to* **10.30** *a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.*

इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। पूर्वाह्न में 10.15 से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका में कोई उत्तर नहीं लिखेंगे।

(vi) *This question paper comprises two Sections -* **A** *and* **B**. *All questions are compulsory.*

यह प्रश्न-पत्र दो खंडों में विभाजित किया गया है – खंड **क** एवं खंड **ख**। सभी प्रश्न अनिवार्य हैं।

(vii) *In* **section A** *- total questions are* **six** *i.e., Q.No.* **1** *to* **6**, *Q.No.* **1** *and* **2** *carry* **10** *marks each, Q.No.* **3** *and* **4** *carry* **5** *marks, Q.No.* **5** *carry* **12** *marks and Q.No.* **6** *carry* **8** *marks.*

**खंड – 'क'** में प्रश्न संख्या 1 से 6 तक **छः** प्रश्न हैं। प्रश्न संख्या 1 से 2 तक प्रत्येक के लिए 10 अंक, प्रश्न संख्या 3 व 4 प्रत्येक के लिए 5 अंक, प्रश्न संख्या 5 के लिए 12 अंक एवं प्रश्न संख्या 6 के लिए 8 अंक निर्धारित हैं।

(viii) *In* **section B** *- total questions are* **six** *i.e., Q.No.* **7** *to* **12**, *Q.No.* **7, 8** *and* **9** *carry* **5** *marks each, Q.No.* **10** *carry* **5** *marks, Q.No.* **11** *carry* **4** *marks and Q.No.* **12** *carry* **6** *marks.*

**खंड – 'ख'** में प्रश्न संख्या 7 से 12 तक **छः** प्रश्न हैं। प्रश्न संख्या 7, 8 व 9 में प्रत्येक के लिए 5 अंक, प्रश्न संख्या 10 के लिए 5 अंक हैं, प्रश्न संख्या 11 के लिए 4 अंक तथा प्रश्न संख्या 12 के लिए 6 अंक निर्धारित हैं।

(ix) *There is no overall choice (except Q. No.* **11**) *in the question paper. However, an internal choice has been provided in Q. No.* **1** *to Q. No.* **10** *and* **12**. *You have to attempt only of the choice in such questions.*

प्रश्न-पत्र में समग्र पर ( प्रश्न संख्या 11 को छोड़कर) कोई विकल्प नहीं है। तथापि प्रश्न संख्या 1 से प्रश्न संख्या 10 व 12 में आन्तरिक विकल्प दिये हुए हैं। ऐसे प्रश्नों में केवल एक ही विकल्प का उत्तर लिखिए।

(x) *In addition to this separate instructions are given with each section and question, wherever necessary.*

इसके अतिरिक्त, आवश्यकतानुसार प्रत्येक अनुभाग और प्रश्न के साथ यथोचित निर्देश दिये गये हैं।

## SECTION - A / खण्ड : 'क' [ 50 अङ्काः ]

**1.** अधः प्रदत्तानां प्रश्नानां विकल्पेभ्यः उत्तराणि चित्वा लिखत-(केवलं दश प्रश्नाः) **1x10=10**

**प्रश्नाः**

(i) समास-अधिकार-सूत्रं किम् ?

(अ) समर्थः पदविधिः (ब) सह सुपा

(स) प्राक्कडारात् समासः (द) कडाराः कर्मधारये

(ii) 'द्वियमुनम्' इति कस्य सूत्रस्य उदाहरणम् ?

(अ) संख्या वश्येन (ब) नदीभिश्च

(स) अन्यपदार्थे च संज्ञायाम् (द) यस्य चायामः

(iii) 'कर्तृकरणे कृता बहुलम्' इति सूत्रस्य उदाहरणं किम् ?

(अ) नखनिर्भिन्नः (ब) गुडधानाः (स) दध्योदनः (द) चक्रमुक्तः

(iv) 'पूर्वस्यां शालायां भवः' इति विग्रहे समस्तपदं किम् ?

(अ) पूर्वशालः (ब) पूर्वशाला (स) पौर्वशालः (द) पूर्वशालिः

(v) 'घन इव श्यामः' = 'घनश्यामः' अत्र केन सूत्रेण समासः भवति ?

(अ) उपमानानि सामान्यवचनैः (ब) विशेषणं विशेष्येण बहुलम्

(स) श्रेण्यादयः कृतादिभिः (द) किं क्षेपे

(vi) 'कृष्णसारङ्गः' इति उदाहरणं कस्य समासस्य ?

(अ) द्वितीया-तत्पुरुषस्य (ब) षष्ठी-तत्पुरुषस्य

(स) कर्मधारयस्य (द) द्विगुसमासस्य

(vii) 'तेन सहेति तुल्ययोगे' इति सूत्रस्य उदाहरणं किम् ?

(अ) सहपुत्रः (ब) रामलक्ष्मणौ (स) पूर्वोत्तरा (द) सपुत्रः

(viii) 'पटुगुप्तौ' इति कस्य सूत्रस्य उदाहरणम् ?

(अ) अजाद्यन्तम् (ब) द्वन्द्वे घि (स) अल्पाच्तरम् (द) निष्ठा

(ix) 'विद्यया यशः' इति कस्य सूत्रस्य उदाहरणम् ?

(अ) हेतौ (ब) इत्थं भूतलक्षणे

(स) सर्वनाम्नस्तृतीया च (द) येनाङ्गविकारः

(x) 'मातुः स्मरति' इति प्रयोगे 'षष्ठी' केन सूत्रेण जाता ?

(अ) षष्ठी शेषे (ब) आशिषिनाथः

(स) अधीगर्थदयेशां कर्मणि (द) कृञः प्रतियत्ने

(xi) 'अस् धातोः' स्थाने 'भू' आदेशः केन सूत्रेण भवति ?

(अ) बहुलं छन्दसि (ब) वा लिटि (स) ब्रुवो वचिः (द) अस्तेर्भूः

2. अधोलिखितसूत्रेषु रेखाङ्कितपदम् आधृत्य यथानिर्दिष्टमुत्तरत। (केवलं पञ्च प्रश्नाः) 2x5=10

(i) सुबामन्त्रिते पराङ्गवत् स्वरे। (पदच्छेदः कः ?)
(ii) तुमर्थाच्च भाववचनात्। (विभक्तिः का ?)
(iii) कतरकतमौ जातिपरिप्रश्ने। (समासः कः ?)
(iv) 'सुपो धातुप्रातिपदिकयोः' (वचनं किम् ?)
(v) 'यस्कादिभ्यो गोत्रे' (विभक्तिः का ?)
(vi) 'चार्थे द्वन्द्वः' (पदच्छेदः कः ?)
(vii) 'संख्यापूर्वो द्विगुः' (समासः कः ?)

3. केषाञ्चन पञ्चसूत्राणाम् अर्थं स्पष्टयत– 1x5=5

(i) सह सुपा
(ii) किं क्षेपे
(iii) कुगतिप्रादयः
(iv) सहयुक्तेऽप्रधाने
(v) यतश्च निर्धारणम्
(vi) अव्ययीभावश्च
(vii) हनोवधलिङि

4. केषाञ्चन पञ्चसूत्राणाम् उदाहरणानि लिखत– 1x5=5

(i) आङ्मर्यादाभिविध्योः
(ii) दिक्संख्ये संज्ञायाम्
(iii) अर्धं नपुंसकम्
(iv) अपवर्गे तृतीया
(v) क्रियार्थोपपदस्य च कर्मणि स्थानिनः
(vi) क्षुद्रजन्तवः
(vii) सनि च

5. त्रीणि रूपाणि साधनीयानि– 4x3=12

पञ्चराजम्, कण्ठेकालः, कौरव्यः पिता, नेनेक्ति ।

6. अतिलघूत्तरीयाः प्रश्नाः साधनीयाः । (केवलम् अष्टप्रश्नाः) 1x8=8

(i) 'शलाकापरि' इति कस्य सूत्रस्य उदाहरणम् ?
(ii) 'तीर्थे ध्वाङ्क्षः' अत्र 'ध्वाङ्क्षः' इत्यस्य कोऽर्थः ?
(iii) 'नीलोत्पलम्' इत्यस्य विग्रहः कः ?
(iv) 'राज्ञां मतः' अत्र प्रयोगे 'मन्' धातोः कः प्रत्ययः ?

(v) 'भय' अर्थे का विभक्तिः भवति?

(vi) अव्ययीभावसमासे 'वीप्सायाः' उदाहरणं किम्?

(vii) 'रात्राह्नाहाः पुंसि' इति सूत्रस्य उदाहरणमेकं लिखत।

(viii) प्रथमाविभक्तिविधायकं सूत्रम् किम्?

(ix) 'ब्रुवो वचिः' इति सूत्रस्य उदाहरणं किम्?

(x) 'रथिकाश्वारोहम्' अत्र कः समासः?

## SECTION - B / खण्डः 'ख' [30 अङ्काः]

**7.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 5

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा। एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

**प्रश्नाः :**

(अ) एकपदेन उत्तरत- ½x2=1

(i) निर्धनो जनः भूरि परिश्रम्य किम् उपार्जितवान्?

(ii) निर्धनो जनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः?

(आ) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नैकम्) 1x1=1

(i) एकदा पिता तनूजस्य काम् आकर्ण्य व्याकुलो जातः?

(ii) कदा विजने प्रदेशे पदयात्रा न शुभावहा?

(इ) यथानिर्देशमुत्तरत- 1x3=3

(i) 'धनम्' इत्यस्य किं पर्यायपदं अत्र प्रयुक्तम्?

(ii) 'करुणापरो गृही' अत्र किं विशेष्यपदं प्रयुक्तम्?

(iii) 'निकटे' इति पदस्य किं विपरीतपदं प्रयुक्तम्?

**8.** अधोलिखितं श्लोकं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 5

**श्लोक :**

मृगाः मृगैः सङ्गमनुव्रजन्ति,
गावश्च गोभिः तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,
समानशील-व्यसनेषु सख्यम्।।

**प्रश्ना :**

(अ) एकपदेन उत्तरत– ½x2=1

(i) मृगा: कै: सह अनुव्रजन्ति ?

(ii) सुधीभि: सङ्गम् के अनुव्रजन्ति ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नैकम्) 1x1=1

(i) गाव: कै: सह तुरगा: च कै: सह अनुव्रजन्ति ?

(ii) सख्यम् कुत्र भवति ?

(इ) यथानिर्देशमुत्तरत – 1x3=3

(i) श्लोके क्रियापदं किं प्रयुक्तम् ?

(ii) 'अश्वा:' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(iii) 'विद्वांस:' इति पदस्य विपरीतार्थकं पदं किं प्रयुक्तम् ?

9. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत– 5

**नाट्यांश: –**

वानर: – (सगर्वम्) अत एव कथयामि यत् अहमेव योग्य: वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्परा: भवन्तु सर्वे वन्यजीवा:।

मयूर: – अरे वानर! तूष्णीं भव। कथं त्वं योग्य: वनराजपदाय ? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षिराज: कृत:, अत: वने निवसन्तं माम् वनराजरूपेणापि द्रष्टुं सज्जा: भवन्तु अधुना।

काक: – (सव्यङ्ग्यम्) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

मयूर: – यत: मम नृत्यं तु प्रकृते: आराधना। पश्य! पश्य! मम पिच्छानामपूर्वं सौंदर्यम्। (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थित: सन्) न कोऽपि त्रैलोक्ये मत्सदृश: सुन्दर:। वन्यजन्तूनाम् उपरि आक्रमणकर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अत: अहमेव योग्य: वनराजपदाय।

**प्रश्ना :**

(अ) एकपदेन उत्तरत– ½x2=1

(i) वानर: कस्मै पदाय आत्मानं योग्यं कथयति ?

(ii) शिरसि शिखां स्थापयता केन अहं मयूर: पक्षिराज: कृत: ?

(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नैकम्) 1x1=1

(i) मयूरस्य नृत्यं कस्या: आराधना ?

(ii) काक: सव्यङ्ग्यम् कम् 'अहिभुक्' इति कथयति ?

(इ) यथानिर्देशमुत्तरत- 1x3=3

(i) 'मन्यामहे' इति क्रियापदस्य कर्तृपदम् किं प्रयुक्तम्?

(ii) 'मम पिच्छानाम् अपूर्वं सौन्दर्यम्' अत्र 'सौन्दर्यम्' इति पदस्य विशेषणपदं किं प्रयुक्तम्?

(iii) 'अधः' इति पदस्य विलोमपदं किं प्रयुक्तम्?

10. अधोलिखितवाक्येषु रेखाङ्कितपदम् आश्रित्य प्रश्ननिर्माणं कुरुत । (केवलं पञ्च प्रश्नाः) 1x5=5

(i) हरिततरूणां ललितलतानां माला रमणीया।

(ii) त्वं मानुषात् बिभेषि।

(iii) अहो! उदात्तरम्यः समुदाचारः।

(iv) इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्।

(v) पिता पुत्राय बाल्ये विद्याधनं यच्छति।

(vi) कश्मीरप्रान्ते धरायाः महत्कम्पनं जातम्।

(vii) चातकः वने वसति।

11. अधोलिखितश्लोकस्य अन्वयपूर्तिं मञ्जूषाप्रदत्तपदानां सहायतया कुरुत- 1x4=4

भुक्ता मृणालपटली भवता निपीता,-
न्यम्बूनि यत्र नलिनानि निषेवितानि।
रे राजहंस! वद तस्य सरोवरस्य,
कृत्येन केन भवितासि कृतोपकारः।।

अन्वयः - हे राजहंस! यत्र भवता (i) __________ भुक्ता अम्बूनि निपीतानि (ii) __________ निषेवितानि, तस्य (iii) __________ केन कृत्येन (iv) __________ भविता असि वद।

**मञ्जूषा**

| | |
|---|---|
| नलिनानि, | कृतोपकारः |
| मृणालपटली, | सरोवरस्य |

**अथवा**

व्यायामं कुर्वतो नित्यं, विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा, निर्दोषं परिपच्यते।।

अन्वयः - नित्यं (i) __________ कुर्वतः विरुद्धम् अपि (ii) __________, विदग्धम् (iii) __________ वा निर्दोषं (iv) __________।

**मञ्जूषा**

| | |
|---|---|
| भोजनम्, | व्यायामम् |
| अविदग्धम्, | परिपच्यते |

12. अधोलिखितवाक्येषु रेखाङ्कितपदानाम् प्रसङ्गानुसारम् अर्थचयनं कुरुत –( केवलं प्रश्नषट्कम्) 1x6=6

(अ) वायुमण्डलं <u>भृशं</u> दूषितम् ।

(i) न्यूनम्
(ii) कठिनम्
(iii) अत्यधिकम्

(आ) यदि एवं तर्हि मां गले बद्ध्वा चल <u>सत्वरम्</u> ।

(i) शीघ्रम्
(ii) शनैः
(iii) सहर्षम्

(इ) आवयोः वंशस्य कर्ता भगवान् <u>सहस्रदीधितिः</u> ।

(i) सागरः
(ii) सूर्यः
(iii) चन्द्रः

(ई) गच्छ वत्से! सर्वं <u>भद्रं</u> जायेत।

(i) कुशलम्
(ii) भयम्
(iii) विघ्नम्

(उ) <u>आचारः</u> प्रथमो धर्मः इत्येतद् विदुषां वचः ।

(i) अध्ययनम्
(ii) आचरणम्
(iii) उपकारः

(ऊ) धूमभस्मावृतं जायते तदा <u>गगनम्</u> ।

(i) भूतलम्
(ii) उद्यानम्
(iii) आकाशः

(ए) आर्य! <u>अलीकम्</u> एतत् ।

(i) युक्तम्
(ii) असत्यम्
(iii) सुन्दरम्

(ऐ) व्यायामो हि सदा <u>पथ्यः</u> ।

(i) हितकरः
(ii) श्रमकरः
(iii) मनोरञ्जकः

-o0o-